# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College under University of Calcutta)

M.A./M.SC. FOURTH SEMESTER EXAMINATION, MAY 2012

SECOND YEAR

SANSKRIT [Vyakarana]

Paper : VII

Date : 23/05/2012
Time : 11 am – 3 pm
Full Marks : 100

1. **एकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×10]
   क) द्वितीयकारिकामनुसृत्य तिङर्थविषयकविचार उपस्थापनीयः।
   ख) फलव्यापारयोर्धातुरिति कारिकायाः निगूढाशयं प्रतिपाद्य फलत्वं व्यापारत्वं च किमिति विशदयत।

2. **द्वयोः** प्रश्नयोरुत्तरं प्रदेयम्। [2×5]
   क) तिङः कतिविधाः अर्थाः ? तत्र संख्यायाः अन्वयः कुत्र भवति ?
   ख) का साध्यक्रिया ? का च सिद्धक्रिया ? धात्वर्थव्यापारः कस्याः क्रियायाः पर्यायः ?
   ग) क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वमिति धातुलक्षणं प्रत्येकपदसार्थक्यप्रतिपादनपुरःसरं विशदयत।

3. **एकस्य** प्रश्नस्योत्तरं विधेयम्। [1×10]
   क) परमलघुमञ्जूषोक्तः स्फोटवादो निरूपणीयः।
   ख) चतसृषु वाक्षु मध्यमावैखर्य्योः स्वरूपं समुल्लिख्य तयोर्भेदः प्रतिपादनीयः।

4. **एकमा**धारीकृत्य टीका रचनीया। [1×5]
   क) शब्दजशब्दन्यायः
   ख) नागेशभट्टः

5. **एकः** प्रश्नः समाधेयः। [1×10]
   क) शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति भट्टाचार्यः, ग्रन्थस्यास्य तथा व्याख्या कार्या, येन सकल-विभक्तीनामर्थः स्पष्टः स्यात्। एवं संसर्गमर्यादाशब्दस्यार्थं निरूप्यास्य वाक्यस्य शाब्दबोधः करणीयः। [4+4+2]
   ख) नीलस्य घटः इत्यत्र कथमभेदान्वयबोधापत्तिः ? कथं वा सा आपत्तिस्तिरोहिता भवति ? समासस्थल व्यासस्थले च आकाङ्क्षायाः स्वरूपमुल्लिख्य उभयत्र आकाङ्क्षाज्ञानशाब्दबोधयोः कार्यकारणभावः प्रदर्श्यताम्। [2+2+6]

6. **एकस्योत्तरं** प्रदेयम्। [1×5]
   क) "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन"— केनाशयेन कथितोऽयं ग्रन्थः ? अस्याशयः वर्ण्यताम्।
   ख) अभेदो यदि भेदप्रतियोगिकोऽभावस्तदा नीलं जलम् इत्यस्य प्रामाण्यापत्तिं प्रदर्श्य तन्निराक्रियताम्।

7. **एकः** प्रश्नः समाधेयः। [1×10]
   क) यथोद्देशं संज्ञापरिभाषम् इति परिभाषा विस्तरेण व्याख्यात।
   ख) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः— परिभाषामिमां विस्तरेण व्याख्यात।

8. **द्वयोः** प्रश्नयोरुत्तरं प्रदेयम्। [2×5]
   क) उभयगतिपरिभाषा कथं ज्ञाप्यते ?
   ख) नानुबन्धकृतमनेजत्वमित्यस्य अवतरणं निर्दिश्य ज्ञापनप्रकारं लिखत।
   ग) कार्यकालपक्षे संज्ञाशास्त्राणां कथं बोधः ?

9. **एकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

क) नागेशदिशा रप्रत्याहारं खण्डयत।

ख) आदिरन्त्येन सहेता इति सूत्रं शेखरदिशा व्याख्यात।

10. **एकस्य** प्रश्नस्य समाधानं कार्यम्। [1×5]

क) माहेश्वरसूत्राणां षड्विधेषु सूत्रेषु क्वान्तर्भाव इति प्रतिपाद्य तेषु कथं न संहिताकार्यं विभक्तेरनुत्पत्तिश्चेति प्रतिपाद्यताम्।

ख) अनुबन्धानां महेश्वरकृतत्वे ञमङणनम् इत्यत्र मकारप्रत्याख्यानपरभाष्यविरोधः परिहरणीयः।

11. **एकः** प्रश्नः समाधेयः। [1×10]

क) का लक्षणा ? लक्षणास्वीकारे का युक्तिः ? लक्षणा कतिविधा ? अन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा लक्षणायाः बोजं युक्त्या प्रतिपाद्यताम्। [1+2+2+5]

ख) पदलक्षणं किम् ? तद्विभागः सोदाहरणम् उपपाद्यताम्।

12. **एकस्योत्तरं** प्रदेयम्। [1×5]

क) एकादशेऽहनि पिता पुत्रस्य नाम कुर्याद् - इति प्राचामभिप्रायं परिष्कृत्य नव्यमतमुपस्थापयत।

ख) तात्पर्यस्य कारणत्वं युक्त्या प्रतिपादनीयम्।